# ॥ षट्प्रश्नोपनिषत्प्रारंभः ॥

११२

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः॥ हरिःॐ॥ सुकेशाचभारद्वाजः
शैब्यश्चसत्यकामःसौर्यायणीचगार्ग्यःकौसल्यश्चाश्वलायनोभार्गवोवैदर्भिःकबंधीकात्यायनस्तेहैतेब्रह्मपराब्र
ह्मनिष्ठाःपरंब्रह्मान्वेषमाणाएषहवैतत्सर्वंवक्ष्यतीतितेहसमित्पाणयोभगवंतंपिप्पलादमुपसन्नाः ॥१॥ तान्हस
ऋषिरुवाच । भूयएवतपसाब्रह्मचर्येणश्रद्धयासंवत्सरंसंवत्स्यथ । यथाकामंप्रश्नान्पृच्छत । यदिविज्ञास्या
मःसर्वंहवोवक्ष्यामइति ॥२॥अथकबंधीकात्यायनउपेत्यपप्रच्छ । भगवन्कुतोहवाइमाःप्रजाःप्रजायंतइति।
तस्मैसहोवाच । प्रजाकामोहवैप्रजापतिः । सतपोतप्यत ॥३॥ समिथुनमुत्पादयते । रयिंचप्राणंचेत्येतौ
मेबहुधाप्रजाःकरिष्यतइति । आदित्योहवैप्राणोरयिरेवचंद्रमाः॥४॥ रयिर्वाएतत्सर्वंयन्मूर्तंचामूर्तंचतस्मा
न्मूर्तिरेवरयिः । अथादित्यउदयन्यत्प्राचींदिशंप्रविशातितेनप्राच्यान्प्राणान्रश्मिषुसन्निधत्ते । यद्दक्षिणांय
त्प्रतीचींयदुदीचींयदधोयदूर्ध्वंयदंतरादिशोयत्सर्वंप्रकाशयतितेनसर्वान्प्राणान्रश्मिषुसन्निधत्ते ॥५॥ सएष
वैश्वानरोविश्वरूपःप्राणोग्निरुदयते । तदेतदृचाभ्युक्तं । विश्वरूपंहरिणंजातवेदसंपरायणंज्योतिरेकंतपंतं।
सहस्ररश्मिःशतधावर्तमानःप्राणःप्रजानामुदयत्येषसूर्यः ॥६॥ संवत्सरोवैप्रजापतिः । तस्यायनेदक्षिणंचो ॥६७१॥

त्तरंच तद्येहवैतदिष्टापूर्तेकृतमित्युपासते । तेचांद्रमसमेवलोकमभिजयंते । तएवपुनरावर्तंते तस्मादेतेऋष
यःप्रजाकामादक्षिणंप्रतिपद्यंते । एषवैरयिर्यःपितृयाणः ॥ ७॥ अथोत्तरेणतपसाब्रह्मचर्येणश्रद्धयाविद्यया
त्मानमन्विष्यादित्यमभिजयंते । एतद्वैप्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्नपुनरावर्तंत
इत्येषनिरोधः । तदेषश्लोकः । पंचपादंपितरंद्वादशाकृतिंदिवआहुःपरेअर्धेपुरीषिणं । अथेमेअन्यउपरेवि
चक्षणंसप्तचक्रेषळरआहुरर्पितमिति ॥८॥ मासोवैप्रजापतिः । तस्यकृष्णपक्षएवरयिःशुक्लःप्राणस्तस्मादेते
ऋषयःशुक्लइष्टिंकुर्वंति । इतरइतरस्मिन् । अहोरात्रोवैप्रजापतिस्तस्याहरेवप्राणोरात्रिरेवरयिः । प्राणंवाए
तेप्रस्कंदंतियेदिवारत्यासंयुज्यंते । ब्रह्मचर्यमेवतद्यद्रात्रौरत्यासंयुज्यते ॥९॥ अन्नंवैप्रजापतिस्ततोहवैतद्रे
तः । तस्मादिमाःप्रजाःप्रजायंतइति । तद्येहवैतत्प्रजापतिव्रतंचरंति । तेमिथुनमुत्पादयंते तेषामेवैषब्रह्म
लोकोयेषांतपोब्रह्मचर्यंयेषुसत्यंप्रतिष्ठितं । तेषामसौविरजोब्रह्मलोकोनयेषुजिह्ममनृतंनमायाचेति ॥ १०॥
इतिप्रथमःप्रश्नः ॥१॥ अथहैनंभार्गवोवैदर्भिःपप्रच्छ । भगवन्कत्येवदेवाःप्रजाविधारयंते । कतरएतत्प्रका
शयंते । कःपुनरेषांवरिष्ठइति ॥१॥ तस्मैसहोवाच । आकाशोहवाएषदेवोवायुरग्निरापःपृथिवीवाङ्मनश्च

 क्षुःश्रोत्रंच तेप्राकाश्याअभिवदंति । वयमेतद्बाणमवष्टभ्यविधारयामइति ॥ २॥ तान्वरिष्ठःप्राणउवाच । 
 मामोहमापद्यथाहमेवैतत्पंचधात्मानंविभज्यैतद्बाणमवष्टभ्यविधारयामीति । तेऽश्रद्दधानावभूवुः । सोभि 
मानादूर्ध्वमुत्क्रमतइव तस्मिन्नुत्क्रामत्यथेतरेसर्वएवोत्क्रामंते । तस्मिंश्चप्रतिष्ठमानेसर्वएवप्रतिष्ठंते ॥३॥ तद्य
थामधुमक्षिकामधुकरराजानमुत्क्रामंतंसर्वाएवोत्क्रमंते । तस्मिंश्चप्रतिष्ठमानेसर्वाएवप्रतिष्ठंते । एवंवाङ्मनश्च
क्षुःश्रोत्रंच । तेप्रीताःप्राणंस्तुन्वंत्येषोग्निस्तपत्येषसूर्यएषपर्जन्योमघवानेषवायुरेषपृथिवीरयिर्देवःसदसच्चामृतं
चयत् ॥४॥ अराइवरथनाभौप्राणेसर्वंप्रतिष्ठितं । ऋचोयजुंषिसामानियज्ञःक्षत्रंचब्रह्मच । प्रजापतिश्चरसि
गर्भेत्वमेवप्रतिजायसे । तुभ्यंप्राणप्रजास्त्विमायत्प्राणैःप्रतितिष्ठसि । देवानामसिवह्नितमःपितॄणांप्रथमास्वधा ।
ऋषीणांचरितंसत्यमथर्वांगिरसामपि ॥ ५ ॥ इंद्रस्त्वंप्राणतेजसारुद्रोसिपरिरक्षिता । त्वमंतरिक्षेचरसिसूर्यस्त्वं
ज्योतिषांपतिः । यदात्वमभिवर्षस्यथेमाःप्राणतेप्रजाः । आनंदरूपास्तिष्ठंतिकामायान्नंभविष्यतीति । व्रात्य
स्त्वंप्राणैकऋषिरत्ताविश्वस्यसत्पतिः । वयमद्यस्यदातारःपितात्वंमातरिश्वनः ॥६॥ यातेतनूर्वाचिप्रतिष्ठितायाश्रोत्रेयाचचक्षुषि । यामनसिसंतताशिवांतांकुरुमोत्क्रमीः । प्राणस्यैतद्वशेसर्वंत्रिदिवेयत्प्रतिष्ठितं । मातेवपु 

त्रात्रक्षस्वश्रीश्चप्रज्ञांविधेहिनइति ॥७॥ प्र०॥२॥ अथहैनंकौसल्यश्चाश्वलायनःपप्रच्छ । भगवन्कुतएषप्राणो
जायते । कथमायात्यस्मिन्शरीरे । आत्मानंवाप्रविभज्यकथंप्रतिष्ठते । केनोत्क्रमतेकथंबाह्यमभिधत्तेकथम
ध्यात्ममिति ॥१॥ तस्मैसहोवाचातिप्रश्नान्पृच्छसिब्रह्मिष्ठोसीति । तस्मात्तेहंब्रवीम्यात्मतएषप्राणोजायते । य
थैषापुरुषेच्छायाएतस्मिन्नेतदाततं ॥२॥ मनोकृतेनायात्यस्मिञ्छरीरे । यथासंम्राडेवाधिकृतान्विनियुंक्तए
तान्ग्रामानधितिष्ठस्वैतान्ग्रामानधितिष्ठस्वेत्येवमेवैषप्राणइतरान्प्राणान्पृथक्पृथगेवसन्निधत्ते ॥३॥ पायूपस्थे
ऽपानंचक्षुःश्रोत्रेमुखनासिकाभ्यांप्राणःस्वयंप्रतिष्ठते । मध्येतुसमानः । एषह्येतद्धुतमन्नंसमंनयतितस्मादेताः
सप्तार्चिषोभवंति । हृदिह्येषआत्मा ॥४॥ अत्रैतदेकशतंनाडीनां । तासांशतंशतमेकैकस्यांद्वासप्ततिंप्रतिशा
खानाडीसहस्राण्यासुव्यानश्चरत्यथैकयोर्ध्वमुदानः पुण्येनपुण्यंलोकंनयतिपापेनपापमुभाभ्यामेवमनुष्यलो
कं ॥५॥ आदित्योहवैबाह्यःप्राणउदयत्येषह्येनंचाक्षुषंप्राणमनुगृह्णानः पृथिव्यांयादेवतासैषापुरुषस्यापानमव
ष्टभ्यांतरायदाकाशःससमानोवायुर्व्यानस्तेजोहवाउदानः । तस्मादुपशांततेजाःपुनर्भवमिंद्रियैर्मनसिसंपद्य
मानैः ॥६॥ यच्चितस्तेनैषप्राणमायाति । प्राणस्तेजसायुक्तःसहात्मनायथासंकल्पितंलोकंनयति । यएवंविद्वा

षट्प्र० न्प्राणंवेदनहास्यप्रजाहीयतेऽमृतोभवति। तदेषश्लोकः। उत्पत्तिमायतिंस्थानंविभुत्वंचैवपंचधा। अध्यात्मंचै निषत्
॥३॥ वप्राणस्यविज्ञायामृतमश्नुतेविज्ञायामृतमश्नुतइति ॥७॥ प्र०॥३॥ अथहैनंसौर्यायणीगार्ग्यःपप्रच्छ। भगव प्र० ४
न्नेतस्मिन्पुरुषेकानिस्वपंति कान्यस्मिन्जाग्रति। कतरएषदेवःस्वप्नान्पश्यति। कस्यैतत्सुखंभवतिकस्मिन्सर्वे
संप्रतिष्ठिताभवंतीति ॥ १ ॥ तस्मैसहोवाच। यथागार्ग्यमरीचयोर्कस्यास्तंगच्छतःसर्वाएतस्मिंस्तेजोमंडलए
कीभवंतिताःपुनरुदयतःप्रचरंत्येवंहवैतत्सर्वंपरेदेवेमनस्येकीभवति। तेनतर्ह्येषपुरुषोनशृणोतिनपश्यतिन
जिघ्रतिनरसयतेनस्पृशतेनाभिवदतेनादत्तेनानंदयतेनविसृजतेनेयायतेस्वपितीत्याचक्षते ॥२॥ प्राणाग्नय
एवैतस्मिन्पुरेजाग्रति गार्हपत्योहवाएषोपानोव्यानोऽन्वाहार्यपचनः। यद्गार्हपत्यात्प्रणीयते प्रणयनादाहव
नीयःप्राणः। यदुच्छ्वासनिःश्वासावेतावाहुतीसमंनयतिससमानोमनोहवावयजमानइष्टंफलमेवोदानः। सए
नंयजमानमहरहर्ब्रह्मगमयति ॥ ३ ॥ अत्रैषदेवःस्वप्नेमहिमानमनुभवतियंदृष्टंदृष्टमनुपश्यतिश्रुतंश्रुतमेवार्थ
मनुशृणोतिदेशदिगंतरैश्चप्रत्यनुभूतंपुनःपुनःप्रत्यनुभवति। दृष्टंचादृष्टंचश्रुतंचाश्रुतंचानुभूतंचाननुभूतंचस ॥६७३॥
च्चासच्चसर्वंपश्यतिसर्वःपश्यति सयदातेजसाभिभूतोभवत्यत्रैषदेवःस्वप्नान्नपश्यति ॥ अथयदेतस्मिञ्छरीरेसु